र्चिताश्चिन्तामणिगणा अपि। गङ्गाजले न तिष्ठन्ति कलिपापानि भीतितः। अतएव हि संसेव्या कलौ गङ्गेष्टसिद्धिदा। सूर्य्योदये तमांसीव वज्रिवज्रभयान्नगाः। तार्क्ष्यस्येक्षणाद्यथा सर्पाः मेघा वाताहृता यथा। तत्त्वज्ञानाद्यथा मोहाः सिंहं दृष्ट्वा यथा मृगाः। तथा सर्व्वाणि पापानि यान्ति गङ्गेक्षणात् क्षयम्। दिव्यौषधैर्यथा रोगा लोभेन च यथा गुणाः। यथा ग्रीष्मोष्मसन्तप्तिरगाधह्रदमज्जनात्। तूलशैलाः स्फुलिङ्गेन यथा नश्यन्ति तत्क्षणात्। तथा दोषाः प्रणश्यन्ति गङ्गाम्भःस्पर्शनाद्ध्रुवम्। क्रोधेन च तपोयद्वत् कामेन च यथा मतिः। अनयेन यथा लक्ष्मीर्विद्या मानेन वै यथा। दम्भकौटिल्यमायाभिर्यथा धर्म्मो विनश्यति। तथा नश्यन्ति पापानि गङ्गायादर्शनेन तु। मानुष्यं दुर्लभं प्राप्य विद्युत्सम्पातचञ्चलम्। गङ्गां यः सेवते सोऽत्र बुद्धेः पारं परं गतः। विधूतपापाये मर्त्त्याः परंज्योतिःस्वरूपिणीम्। सहस्रसूर्य्यप्रतिमां गङ्गां पश्यन्ति ते भुवि। साधारणाम्बुना पूर्णां साधारणनदीमिव। पश्यन्ति नास्तिका गङ्गां पापोपहतलोचनाः। संसारमोचकस्याहं जनानामनुकम्पया। गङ्गातरङ्गरूपेण सोपानं निर्ममे दिवः। सर्व्व एव शुभः कालः सर्व्वो देशस्तथा शुभः। सर्व्वे जना दानपात्रं श्रीमति जाह्नवीतटे। यथाश्वमेधो यज्ञानां नगानां हिमवान् यथा। व्रतानान्तु यथा सत्यं दानानामभयं यथा। प्राणायामश्च तपसां मन्त्राणां प्रणवो यथा। धर्म्माणामप्यहिंसा च कन्यानां श्रीर्यथा वरा। यथात्मविद्या विद्यानां स्त्रीणां गौरी यथोत्तमा। सर्व्वदेवगणानाञ्च यथाहं परमेश्वरः। सर्व्वेषामेव भक्तानां शिवभक्तो यथा वरः। तथा सर्व्वेषु तीर्थेषु गङ्गातीर्थं विशिष्यते। हरे! यस्त्वावयोर्भेदं न करोति महामतिः। शिवभक्तः स विज्ञेयो महापाशुपतश्च सः। पापपांशुमहावात्या पापद्रुमकुठारिका। पापेन्धनदवाग्निश्च गङ्गेयं पुण्यवाहिनी। नानारूपाश्च पितरो गाथां गायन्ति सर्व्वदा। अपि कश्चित् कुलेऽस्माकं गङ्गास्नायी भविष्यति। देवर्षीन् परिसन्तर्प्य दीनानाथांश्च दुःखितान्। श्रद्धया विधिना स्नात्वा दास्यते सलिलाञ्जलिम्। अपि नः स कुले भूयाच्छिवे विष्णौ च साम्यदृक्। तदालयकरो भक्त्या तत्र सम्मार्ज्जनादिकृत्। अकामो वा सकामो वा तिर्य्यग्योनिगतोऽपि वा। गङ्गायां यो मृतो मर्त्त्यो नरकं न स पश्यति।

तीर्थमन्यत् प्रशंसन्ति गङ्गातीरे स्थिताश्च ये। गङ्गां न बहु मन्यन्ते ते स्युर्निरयगामिनः। माञ्च त्वाञ्चैव गङ्गाञ्च यो द्वेष्टि पुरुषाधमः। स्वकीयैः पितृभिः सार्द्धं स घोरं नरकं व्रजेत्। षष्टिर्गणसहस्राणि गङ्गां रक्षन्ति सर्व्वदा। अभक्तानाञ्च पापानां वासे विघ्नं प्रकुर्व्वते। कामक्रोधमहामोहलोभादिनिशितैः शरैः। घ्नन्ति तेषां मनस्तत्र स्थितिञ्चापनयन्ति च। गङ्गां समाश्रयेत् यस्तु स मुनिः स च पण्डितः। कृतकृत्यः स विज्ञेयः पुरुषार्थचतुष्टये। गङ्गायाञ्च सकृत्स्नातो हयमेधफलं लभेत्। तर्पयंश्च पितॄंस्तत्र तारयेन्नरकार्णवात्। नैरन्तर्य्येण गङ्गायां मासं यः स्नाति पुण्यभाक्। स शक्रलोके वसति यावच्छक्रः सपूर्व्वजः। अब्दं स्नाति च गङ्गायां नैरन्तर्य्येण पुण्यवान्। विष्णुलोकं समागत्य ससुखं संवसेन्नरः। गङ्गायां स्नाति यो मर्त्त्यो यावज्जीवं दिने दिने। जीवन्मुक्तः स विज्ञेयो देहान्ते मुक्त एव सः। तिथिनक्षत्रपर्व्वादि नापेक्ष्यं जाह्नवीजले। स्नानमात्रेण गङ्गायां सञ्चिताघं विनश्यति। पण्डितोऽपि स मूर्खः स्याच्छक्तियुक्तोऽप्यशक्तिकः। यस्तु भागीरथीतीरं सुखसेव्यं न संश्रयेत्। किमायुषाप्यरोगेण विकाशिन्याथ किं श्रिया। किं वा बुद्ध्या विमलया यदि गङ्गां न सेवते। यः कारयेदायतनं गङ्गाप्रतिकृतेर्नरः। भुक्त्वा स भोगान् प्रेत्यापि याति गङ्गासलोकताम्। शृण्वन्ति महिमानं ये गङ्गाया नित्यमादरात्। गङ्गास्नानफलं तेषां वाचकप्रीणनाद्धनैः। पितॄनुद्दिश्य यो लिङ्गं स्नपयेद्गाङ्गवारिणा। तृप्ताः स्युस्तस्य पितरो महानिरयगा अपि। अष्टकृत्वो मन्त्रजप्तैर्वस्त्रपूतैः सुगन्धिभिः। प्रोचुर्गाङ्गैर्जलैः स्नानं घृतस्नानादिकं बुधाः। आपः क्षीरकुशाग्राणि घृतं दधि गवां मधु। रक्तानि करवीराणि रक्तचन्दनमित्यपि। अष्टद्रव्यविमिश्रेण गङ्गातोयेन यः सकृत्। माधव! प्रस्थमात्रेण ताम्रपात्रस्थितेन च। भानवेऽर्घं प्रदद्याच्च स्वकीयपितृभिः सह। सोऽतितेजोविमानेन सूर्य्यलोके महीयते। अशाङ्गोऽर्व्वोऽप्यसुद्दिष्टस्तेनैव रवितोषणः। गाङ्गैर्वाभिः कोटिगुणो ज्ञेयो विष्णोऽन्यवारितः। गङ्गातीरेषु शक्त्या यः कुर्य्याद्देवालयं सुधीः। अन्यतीर्थप्रतिष्ठातो लभेत् कोटिगुणं फलम्। कूपवापीतड़ागादिप्रपादानादिभिस्तथा। अन्यत्र यद्भवेत् पुण्यं तद्गङ्गा-